# द्रुतवाचनम्

## (प्रहेलिका)

[जीवन की आरम्भिक अवस्था में बौद्धिक विकास, तर्कशक्ति की प्रखरता, कल्पनाशक्ति के संवर्धन तथा मनोरञ्जन की दृष्टि से संसार की प्रमुख भाषाओं में प्रहेलिकाओं का विकास हुआ है। इन्हें "पहेली" तथा Riddles कहा जाता है। इन्हें सुनकर शिक्षार्थी अपनी कल्पना तथा तर्क के द्वारा उत्तर खोजने का प्रयास करता है जिससे उसकी बौद्धिक क्षमता बढ़ती है। संस्कृत भाषा में भी प्राचीन काल से ही प्रहेलिकाएँ रही हैं। यहाँ प्राचीन और आधुनिक दोनों प्रकार की प्रहेलिकाओं का संकलन प्रस्तुत किया गया है। शिक्षार्थी पहले अपनी कल्पना से इन्हें हल करने का प्रयास करें तब दिये गये उत्तरों से समाधान प्राप्त करें।]

नित्यं भ्रमति योगी न महदुष्णो न पावकः ।<br>
विकासयति यः पद्मं वृत्ताकारो वदन्तु कः ? ॥1॥

वर्धते यः कदाचित्तथा क्षीयते<br>
दृश्यते वा कदाचिन्न तद् दृश्यते ।<br>
वारिधिर्नास्ति नैवाऽस्ति वायुस्तथा,<br>
कोऽस्ति सः तस्य किन्नामधेयं सखे ? ॥2॥

विश्वप्रसिद्धा भुवि राजमाना,<br>
प्रकाशमाना न रविर्न वह्निः ।<br>
न रूपमेवाऽस्ति तथापि लोके,<br>
सर्वत्र सर्वैरवलोक्यते का ? ॥3॥


भ्रमामि नित्यं न शशी न भानुः
चक्राणि मे सन्ति न तेषु वायुः ।
वहामि लोकान् न च वायुयानं,
वदन्तु मे किं खलु नामधेयम् ? ॥4॥

गगने डयते न खगो न सुरो,
न शशिर्न रविर्हनुमानपि नो ।
जनवाहनमस्ति भुवि प्रथितं,
नरनिर्मितमस्ति सखे ! वद किम् ॥5॥


अस्थि नास्ति शिरो नास्ति,
बाहुरस्ति निरंगुलिः ।
नास्ति पादद्वयं गाढम्,
अंगमालिंगति स्वयम् ॥6॥

**उत्तराणि** - 1. सूर्यः, 2. चन्द्रमाः, 3. विद्युत्,
4. रेलयानम्, 5. आकाशवाणी (रेडियो), 6. कञ्चुकः (कुर्ता













**शब्दार्थाः**

| | | |
|---|---|---|
| नित्यम् | – | प्रत्येक दिन |
| भ्रमति | – | घूमता है |
| योगी | – | साधक |
| न/नो | – | नहीं |
| महदुष्णः | – | अत्यधिक गर्म |
| पावकः | – | आग |
| विकासयति | – | विकसित करता है |
| यः | – | जो |
| पद्मम् | – | कमल |
| वृत्ताकारः | – | गोल आकार का |
| वदन्तु | – | कहें, बोलें, बताएँ |
| वर्धते | – | बढ़ता है |
| कदाचित् | – | कभी |
| क्षीयते | – | घटता है |
| दृश्यते | – | दिखाई देता है |
| वारिधिः | – | समुद्र |
| किन्नामधेयम् | – | किस नाम का |

| | | |
|---|---|---|
| सखे | – | मित्र (सम्बोधन) |
| भुवि | – | धरती में, पृथ्वी में |
| राजमाना | – | सुशोभित है, विराजमान है |
| प्रकाशमाना | – | प्रकाशित होती हुई |
| रविः | – | सूर्य |
| वह्निः | – | आग |
| रूपम् | – | आकार, स्वरूप |
| लोके | – | संसार में |
| सर्वत्र | – | सभी जगह |
| सर्वैः | – | सभी लोगों के द्वारा |
| अवलोक्यते | – | देखी जाती है |
| शशी | – | चन्द्रमा |
| भानुः | – | सूर्य |
| चक्राणि | – | पहिये (बहुवचन) |
| वायुयानम् | – | हवाई जहाज |
| खलु | – | निश्चय ही |
| गगने | – | आकाश में |
| डयते | – | उड़ता है |

| | | |
|---|---|---|
| खगः | – | पक्षी |
| सुरः | – | देवता |
| जनवाहनम् | – | लोगों का वाहन |
| प्रथितम् | – | प्रसिद्ध |
| अस्थि | – | हड्डी |
| नरनिर्मितम् | – | मनुष्य द्वारा बनाया हुआ |
| शिरः | – | सिर |
| निरंगुलिः | – | बिना अंगुली वाला |
| पादद्वयम् | – | दो पैर |
| गाढम् | – | बहुत अधिक |
| अंगम् | – | शरीर में |
| आलिंगति | – | लिपटता है |

## सन्धि विच्छेदः –

| | | |
|---|---|---|
| महदुष्णः | = | महत् + उष्णः |
| कदाचिन्न | = | कदाचित् + न । |
| वारिधिर्नास्ति | = | वारिधिः + नास्ति । |
| वायुस्तथा | = | वायुः + तथा । |
| कोऽस्ति | = | कः + अस्ति । |

| | | |
|---|---|---|
| किन्नामधेयम् | = | किम् + नामधेयम् । |
| रविर्न | = | रविः + न |
| रूपमेवाऽस्ति | = | रूपम् + एव + अस्ति |
| रविर्हनुमानपि | = | रविः + हनुमान् + अपि |
| नास्ति | = | न + अस्ति |
| बाहुरस्ति | = | बाहुः + अस्ति |
| निरंगुलिः | = | निः + अंगुलिः |

**प्रकृति–प्रत्यय विभागः**

| | | |
|---|---|---|
| भ्रमामि | – | √भ्रम्, लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| वदन्तु | – | √वद्, लोट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| अस्ति | – | √अस्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| वहामि | – | √वह्, लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| दृश्यते | – | √दृश्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| सन्ति | – | √अस्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |

**अभ्यासः**

**(मौखिकः)**

1. **प्रहेलिकाः सस्वरं गायत ।**
2. **अधोलिखितानां पदानां धातुं वदत ।**

(क) अस्ति, सन्ति, वदति, भ्रमामि, वदन्तु, वहामि, ।

3. **अधोलिखितानां पदानाम् अर्थं वदत–**

खगः, पावकः, अस्थि, पादद्वयम्, कदाचित्, वर्धते, सर्वत्र, विकासयति, प्रकाशमाना, सुरः, गगनम् ।

## (लिखितः)

1. **एकपदेन उत्तरं दत्त –**

(क) सूर्यः नित्यं किं करोति ?

(ख) कः क्षीयते वर्धते च ?

(ग) खगः कुत्र डयते ?

(घ) गगने शशिवत् नित्यं कः भ्रमति ?

(ङ) भुवि प्रचितं किम् ?

(च) कीदृशः कञ्चुकस्य बाहुः अस्ति ?

(छ) अंगम् कः आलिंगति ?

2. **उचितं मेलनं कुरुत–**

| | |
|---|---|
| (क) विश्वप्रसिद्धा भुवि | (i) खगो न सुरः |
| (ख) भ्रमामि नित्यं न | (ii) तथापि लोके |
| (ग) न रूपमेवाऽस्ति | (iii) शिरो नास्ति |
| (घ) गगने डयते न | (iv) राजमाना |
| (ङ) अस्थि नास्ति | (v) शशी न भानुः |

3. **अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत –**

वायुस्तथा, रविर्न, नास्ति, नैवाऽस्ति, किन्नामधेयम्, कोऽस्ति, महदुष्णः

4. **पर्यायवाचिनः शब्दान् लिखत–**

यथा – भानुः = रविः

| | | |
|---|---|---|
| (क) पावकः | – | – |
| (ख) शशीः | – | – |
| (ग) वायुः | – | – |
| (घ) गगनम् | – | – |
| (ङ) खगः | – | – |
| (च) सुरः | – | – |
| (छ) भुवि | – | – |


5. **अधोलिखितपदेषु लकारं पुरुषं वचनं च लिखत –**

| | लकारः | पुरुषः | वचनम् |
|---|---|---|---|
| यथा–पठन्तु | लोट्लकारः | प्रथमपुरुषः | बहुवचनम् |
| (क) भ्रमति | – | – | – |
| (ख) अस्ति | – | – | – |
| (ग) वदन्तु | – | – | – |
| (घ) सन्ति | – | – | – |
| (ङ) भ्रमाणि | – | – | – |
| (च) वहामि | – | – | – |
| (छ) दृश्यते | – | – | – |

◆◆◆

# सूक्ति-सुधा

[संस्कृत की अनेक विशिष्टताओं में एक यह भी है कि हजारों वर्षों से इसमें अनेक सुन्दर वाक्य प्रचलित रहे हैं जो मानव जीवन को सन्मार्ग दिखाते हैं । ये वाक्य कहीं-कहीं तो प्रसिद्ध साहित्यिक तथा नीतिपरक ग्रन्थों में प्रयुक्त हैं तो कुछ ऐसे भी हैं जिनके रचयिता का नाम अन्धकार में है । संस्कृत पढ़े हुए व्यक्ति प्रायः अपने वार्तालापों में इन सुन्दर वचनों (सूक्तियों) का प्रयोग तात्कालिक स्थिति के निरूपण के लिए अथवा अपने कथ्य की पुष्टि के लिए करते हैं । प्रस्तुत पाठ में अनेक सूक्तियाँ संकलित की गयी हैं जिनका जीवन में महत्त्व है । इनका उपयोग निबन्धों या अन्य रचनाओं की सौन्दर्यवृद्धि के लिए हो सकता है । किसी भी कथ्य की पुष्टि समुचित सूक्ति से करने पर उसका व्यापक प्रभाव होता है ।]



1. धर्मो रक्षति रक्षितः ।
2. आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ।
3. सर्वारम्भाः तण्डुलप्रस्थमूलाः ।

4. गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ।

5. सत्यश्रमाभ्यां सकलार्थसिद्धिः ।

6. मितं च सारं च वचो हि वाग्मिता ।

7. परसदननिविष्टः को लघुत्वं न याति ।

8. हितं मनोहारि च दुर्लभं वचः ।

9. समय एव करोति बलाबलम् ।

10. क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।

11. परोपदेशवेलायां शिष्टाः सर्वे भवन्ति हि ।

12. विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।

13. वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ।

14. यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।

15. शरीरमाद्यं खलु धर्मसाधनम् ।

16. सतां सद्भिः संगः कथमपि हि पुण्येन भवति ।

17. मानवं पुत्रवद् वृक्षास्तारयन्ति परत्र च ।

18. ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ।

19. अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ।

20. आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।

**शब्दार्थाः**

| | | |
|---|---|---|
| रक्षितः | – | बचाया गया |
| आहारे | – | भोजन में |
| व्यवहारे | – | लेन-देन में, सामान्य क्रिया-कलाप में |
| त्यक्तलज्जः | – | लज्जा को छोड़ने वाला |
| भवेत् | – | होता है |
| सर्वारम्भाः | – | सभी कार्य |
| तण्डुलप्रस्थमूलाः | – | एक पसेरी चावल (भोजन) के लिए ही होते हैं |
| सकालार्थसिद्धिः | – | सभी अर्थों की सिद्धि |
| मितम् | – | संक्षिप्त |
| सारम् | – | तथ्य से भरा हुआ |
| वचः | – | वाणी |
| वाग्मिता | – | वाक्पटुता |
| परसदननिविष्टः | – | दूसरे के घर में रहने वाला |
| लघुत्वम् | – | महत्त्व से रहित स्थिति को |
| हितम् | – | भला करने वाला, कल्याणकारी |
| मनोहारि | – | सुन्दर, प्रिय |
| बलाबलम् | – | बलवान और निर्बल (बलच्य अबलच्य तयोः समाहारः) |

| | | |
|---|---|---|
| नवतामुपैति | – | नवीनता को प्राप्त करता है |
| विक्रियन्ते | – | विकृत होते हैं, बदलते हैं |
| चेतांसि | – | चित्त, मन, दिमाग |
| धीराः | – | धैर्यवान् लोग |
| रमणीयतायाः | – | सुन्दरता का |
| परोपदेशवेलायाम् | – | दूसरे को उपदेश देने के समय |
| शिष्टाः | – | विनम्र, अच्छे आचरण वाले |
| सर्वे | – | सभी |
| विकारहेतौ सति | – | विकृति का कारण रहने पर भी |
| वृणते | – | खोज लेती हैं, चुन लेती हैं |
| विमृश्यकारिणम् | – | विवेकी, सोच समझ कर कार्य करने वालों को |
| गुणलुब्धाः | – | गुण के लोभी, गुणों से आकृष्ट |
| प्रज्ञा | – | ज्ञान, बुद्धि |
| आद्यम् | – | पहला |
| सताम् | – | सज्जनों की |
| सद्भिः | – | सज्जनों के साथ |
| तारयन्ति | – | पार करते हैं / रक्षा करते हैं |
| परत्र | – | परलोक में, जीवन के बाद |
| ज्ञानलवदुर्विदग्धम् | – | अल्पज्ञान से कुतर्क करने वाला |

| | | |
|---|---|---|
| रञ्जयति | – | प्रसन्न करता है |
| वित्ततः | – | धन से |
| वृत्ततः | – | आचरण से |
| आत्मनः | – | अपने |
| प्रतिकूलानि | – | विपरीत (बहुवचन) |
| परेषाम् | – | दूसरों के प्रति |
| समाचरेत् | – | आचरण करें |
| हतः | – | मारा गया |

## सन्धिविच्छेदः/पदविच्छेदः

| | | |
|---|---|---|
| सर्वारम्भाः | – | सर्व + आरम्भाः |
| सकलार्थसिद्धिः | – | सकल + अर्थसिद्धिः |
| दुर्लभम् | – | दुः + लभम् |
| बलाबलम् | – | बल + अबलम् |
| नवतामुपैति | – | नवताम् + उपैति |
| तदेव | – | तत् + एव |
| परोपदेशवेलायाम् | – | पर + उपदेशवेलायाम् |
| शरीरमाद्यम् | – | शरीरम् + आद्यम् |
| वृक्षास्तारयन्ति | – | वृक्षाः + तारयन्ति |
| ज्ञानलवदुर्विदग्धम् | – | ज्ञानलवदुः + विदग्धम् |
| वृत्ततस्तु | – | वृत्ततः + तु |

समाचरेत् – सम् + आचरेत्

**प्रकृति-प्रत्यय-विभागः**

| | | |
|---|---|---|
| रक्षितः | = | $\sqrt{\text{रक्ष्}}$ + क्तः |
| याति | = | $\sqrt{\text{या}}$, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| उपैति | = | उप + $\sqrt{\text{इ}}$ लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| भवेत् | = | $\sqrt{\text{भू}}$, विधिलिङ्, प्रथमपुरुषः, एकवचनम् |
| करोति | = | $\sqrt{\text{कृ}}$, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| भवन्ति | = | $\sqrt{\text{भू}}$, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |

## अभ्यासः

### मौखिकः

1. **अधोलिखितानां पदानाम् अर्थं वदत–**

व्यवहारे, मितम्, सारम्, वाग्मिता, चेतांसि, वृणते, परेषाम्

2. **उदाहरणानुसारेण भावबोधिकां सूक्तिं वदत –**

यथा–अपने लिए जो उचित नहीं है उसे दूसरे के लिए नहीं करना चाहिए ।

उत्तर – आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।

(क) कल्याणकारी और मनोहारी वचन (वाणी) दुर्लभ है ।

.......................................................................................

(ख) समय ही किसी को बलवान् या निर्बल बनाता है ।

.......................................................................................

(ग) गुणलोभी सम्पत्तियाँ विवेकशील व्यक्ति को चुन लेती हैं ।

.......................................................................................

(घ) सत्य और परिश्रम से सभी कार्य सिद्ध होते हैं ।

.......................................................................................

(ङ) सभी कार्यों का मूल एक पसेरी चावल है ।

.......................................................................................

## लिखितः

**1. कोष्ठप्रदत्तेषु शुद्धं शब्दं चित्वा रिक्तस्थानानि पूरयत–**

(क) .............. रक्षति रक्षितः । (धर्मः/ पापम्)

(ख) परसदननिविष्टः को ............न याति । (गुरुत्वम् /लघुत्वम्)

(ग) हितं मनोहारि च .............. वचः ।(सुलभम्/दुर्लभम्)

(घ) .............. एव करोति बलाबलम् । (नरः/समयः)

(ङ) आहारे व्यवहारे च त्यक्तलज्जः .......... भवेत् । (सुखी/दुःखी)

2. अधोलिखितानि वाक्यानि पाठाधारेण सत्यम् (√) असत्यं (×) वा चिह्नी-कुर्वन्तु –

(क) शरीरमाद्यं खलु धर्मसाधनम् । ()

(ख) परोदेशवेलायां सर्वे शिष्टाः न भवन्ति । ()

(ग) सतां सद्भिः संगः अपुण्येन भवति । ()

(घ) आत्मनः प्रतिकूलानि परेषां समाचरेत् । ()

(ङ) सत्यश्रमाभ्यां सकलार्थसिद्धिः । ()

3. 'क' स्तम्भस्य वाक्यैः सह 'ख' स्तम्भस्य वाक्यानि योजयत –

| 'क' | 'ख' |
| --- | --- |
| (क) हितं मनोहारि च | (i) धर्मसाधनम् । |
| (ख) शरीरमाद्यं खलु | (ii) तण्डुलप्रस्थमूलाः । |
| (ग) समय एव करोति | (iii) परेषां न समाचरेत् । |
| (घ) सर्वारम्भाः | (iv) दुर्लभं वचः । |
| (ङ) आत्मनः प्रतिकूलानि | (v) रक्षितः । |
| (च) धर्मो रक्षति | (vi) बलाबलम् । |

**4.** उदाहरणानुसारेण द्विवचनरूपं लिखत

| एकवचनम् | – | द्विवचनम् |
|---|---|---|
| यथा भवति | – | भवतः |
| (क) चलामि | – | |
| (ख) अस्ति | – | |
| (ग) दहति | – | |
| (घ) तिष्ठसि | – | |
| (ङ) भविष्यति | – | |

**5.** **निम्नलिखितानां प्रश्नानाम् उत्तरम् एकपदेन लिखत –**

(क) आहारे व्यवहारे च त्यक्तलज्जः कीदृशः भवेत् ?

(ख) आद्यं धर्मसाधनम् किम् भवति ?

(ग) सतां सद्भिः संगः कथम् भवति ?

(घ) हितं मनोहारि च किम् दुर्लभम् ?

(ङ) कः बलाबलं करोति ?

(च) सत्यश्रमाभ्यां कस्य सिद्धिः ?

6. अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत–

(क) तदेव = ............ + एव ।

(ख) सर्वारम्भाः = सर्व + .......... ।

(ग) समाचरेत् = ............ + आचरेत् ।

(घ) नवतामुपैति = नवताम् + ............।

(ङ) बलाबलम् = .............. + ..............

7. विलोमपदानि लिखत–

| | | |
|---|---|---|
| यथा | पुण्यम् | – पापम् |
| (क) | धर्म : | – |
| (ख) | अस्ति | – |
| (ग) | सज्जनाः | – |
| (घ) | सुखम् | – |
| (ङ) | सत्यम् | – |
| (च) | गुणाः | – |

◆◆◆